संस्कृत

क्र.नं.

स्तोत्र

कालिकाशतनाम

६८ / स्तो. २५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥अथकालीशतनामस्तोत्रप्रारंभः॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

श्रीगणेशायनमः॥सुखस्थितंजगन्नाथंकैलासे
गिरिजैकदा॥आलिंग्याहकथंवासंदत्त्वार्धांगे
ध्रुवंवसे॥१॥मज्जनिंकालिकांप्राकुर्वंस्त्वाध्यास्त
त्वदर्शिनः॥जातासन्ध्याकथंकस्मैकेनवाद्यप्रसी
दति॥२॥श्रुत्वेतिशिववचनंदेव्याविस्मितोत्फुल्ललो
चनः॥उवाचप्रहसन्देवःस्वलन्मनोनंदयन्निव॥३॥
लक्ष्मणेशरसंभिन्नंविलपंतंरघूत्तमं॥चतुर्वर्गाति॥४॥

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

काकालीप्रादुर्भूतांजनप्रभा॥ हर्षयंतीनमूचेमुश्च
तुर्वर्गात्मकंमनुं॥ रामगृहाणसङ्क्त्यात्रैलोक्यवि(
जिगीषया॥ ५॥ रामउवाच॥ मातश्चेन्मेप्रसन्नासि
कालिकेकालनाशिनि॥ रहस्यंकथयाचक्ष्वजपाम्यर्चा
म्यहंसदा॥ ६॥ तथाचाचार्यजपध्यानंमातृकाभूतशो
धनैः॥ बलितर्पणहोमाद्यैः प्रसीदत्तद्विनावद॥ ७॥ श
क्तिरुवाच॥ साधुपृष्टंत्वयाप्राज्ञदातुमेवाहमागता

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

 

आधिमालोक्यतेराम तन्मद्भक्त्याऽवधारय ॥८॥ गु
ल्याद्गुल्यतरोयंमेस्तवोमंत्रश्चकामदः ॥ गोप्यःपठ्य
श्चजप्यश्चमंगल्यःपावनोघहा ॥९॥ सकृद्यस्मिन्स्मृ
तेजप्तेविघ्नानश्यंतिदारुणाः ॥ यांतिकल्पोक्तविधि
नामहापापामहापदः ॥१०॥ सिद्धयःसंपदोविद्याभा
ग्यान्यायुर्द्युतिश्रियः ॥ भवंतिराजसौख्यानिसंपूज्य
पठतःसदा ॥११॥ पर्यंकेरक्तनक्तस्यारक्तस्त्रग्गंधभू ॥२॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

षणः॥योर्चेद्छक्त्यान्वितोनग्नश्चिंत्यांबोसः स्वयंप्रभुः
॥१२॥मुक्तकेशो निशीथेयः शक्त्यानग्नकपालिनी॥स्तो
त्येनेनचसंपूज्ययथाशक्तिः ससिद्धिभाक्॥१३॥प्रासे
विघ्नैस्मेरध्यस्तांकालींकालघनोपमां॥अष्टाधिकश
तंनाम्नापठेत्स्तोत्रमनन्यधीः॥१४॥नभीर्नशोकोनगदो
नाघस्तस्यनदुर्गतिः॥न विघ्नसंभवःक्वापिसस्यात्सर्व
द्धिभाजनं॥१५॥कालिकास्तवमंत्रस्यस्वयंभान्त्यृषिरी

Joint project of The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

का० श०

(५)

रितः ॥ छंदोनुष्टुप् देवता च जगन्मंगलदायिनी ॥ सांतो
ग्निश्रींदु बिंद्वाढ्यो दुर्गा वर्माक्षयुग्मनु ॥ त्हन्मूर्ध्नि
पादसर्वांगेन्यसेदाद्यंकं षडंगके ॥ ७ ॥ को ग्नींदुसेश्री
युक्तानि वर्मातोपि महामनुः ॥ षट्दीर्घैरादिबीजस्य
षडंगमरिमर्दनं ॥ ८ ॥ शैलेंद्रस्वर्णशृंगे त्रिदशापरि
वृता सिंहपृष्टांबुजस्था मेघः श्यामा त्रिनेत्रा शवत्हदि
शशिभ्रद्रक्तभूषांगरागा ॥ दोर्भिः शंखारिबाणानमपि ॥ ३ ॥

नाम०

(8A)

च्चषकमपिस्कंधदेशेवसंतिचापंचर्मासिघंटाम
णिमयरशनाकालिकाकामदास्तु॥१९॥ ॐ कला
कलावतीकर्त्रीकिमनीयाकुलेश्वरी॥कपर्दिनीक
मलिनीकमलाकमलालया॥२०॥कपालिनीक
पालांगीकपालकरभूषणा॥कपालमालिका
कन्याकदंबवनचारिणी॥२१॥कल्याकल्यांगना
गाढ्याकल्याणीकल्पितार्थदा॥कल्पनाकल्पव

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

का॰श॰ ल्लीच कस्तूरीलक्ष्मखक्षिता॥२२॥कदंबवर्णाकपि नाम॰
(5) लाकरालास्याकरालिनी॥कल्पिनीकर्मदात्रीच
कलुषघ्नीकरंकिनी॥२३॥कामदाकामिनीकांताका
माक्षाकामसुंदरी॥कामधुक्कामिनीकांताकालिं
दीकालभैरवी॥२४॥कात्यायनीकालरात्रिःकाल
ज्ञाकालकर्णिका॥कृपाकलाकिशोरीचकीरवस्त्रा
किरीटिनी॥२५॥कीलकीकीलहस्ताचकीर्त्तिभक्ती ॥६॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(5A)

र्जनप्रिया॥कुंडोदरीकुंडलिनीकुरुकुल्लाकुब्जार्चिता॥
॥२६॥कुलालीकुलिशांगीकुःकुटिलाकुटिलालका
कुलेंद्रवीकुलेशानीकुलीनाकुलपालिनी॥२७॥कु
लमालाकुलोद्भूताकुलशक्तिःकुलव्रता॥कुंकुमांगा
कुकुःकुंदप्रभाकुंजरगामिनी॥२८॥कुसुंभवस्त्राकु
सुममालिकाकुसुमायुधा॥कूष्मांडीकूर्मपृष्ठांगी
क्रूरघ्नीक्रूरकर्मणि॥२९॥कृष्णांगीकृष्णवसनाकृ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

का॰श॰ ष्णाकृष्णांगभूषणा॥कूलघ्नाकृन्तिनीकृत्याकृपा नाम॰
क्षुत्तृद्दयाकृपा॥३०॥ कृशोदरीकृशांगीच कृपणा
(6) कृतसंगरा॥केवलीकिरलीकेलीप्रियाकैटभम
र्दिनी॥३१॥कैवल्यमुक्तिःकैलासवासिनीक्रोध
विग्रहा॥कौमारीकौलिकीकौन्तिःकौशिकीकौशि
कार्चिता॥३२॥ कंजाक्षीकंबुकंठीच कंटकीकटका
र्दिनी॥ इत्येतज्जगदंबायानाम्नामष्टाधिकंशतं ॥५॥

(6A)

॥३३॥ कार्यसिद्धिकरं विघ्ननाशनं सकलर्द्धिदं ॥ नातः
परतरं स्तोत्रं कामदं कालिकास्तवात् ॥३४॥ नामाष्ट
शतकं जस्वापठेन्नाम सहस्रकं ॥ यस्तस्य महतीसि
द्धिः श्रियासहनसंशयः ॥३५॥ नामाष्टशतमंवाया
स्त्रिसंध्यं यः पठेत्सदा ॥ सहस्रनाम्ना किं तस्य येनै
वाप्नोति सद्गतिं ॥३६॥ श्रद्धाहीनोतिश्रद्धोवा त्रिसं
ध्यं वान्वयत्सकृत ॥ पठेद्वाशृणुयाद्वापि जाग्रदादौ

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

का॰श॰ दिवानिशं॥३५॥देवीमभ्यर्च्चयित्वादौ स्त्रियोगेवाप्सु नाम॰
वस्थले॥ बटुश्रीकोबटुज्जनोबटुभाग्योबटुप्रियः
(७) ॥३८॥ भवेदमलकीर्तिश्च दीर्घायुर्मोहनः सुवाक्
ह्रींदुर्गावर्मफट्स्वांतेजपेद्यद्यइमंमनुं॥३९॥कुर्या
च्छिवंसदाप्रेम्णामातेवजगदंबिका॥रक्तगंधाक्ष
तैःपुष्पैःसिंदूराभरणादिभिः॥४०॥फलमूलाभि
धान्नाद्यैस्तांबूलैर्यान्विधेदुमां॥वीतभीर्विगतक्लेशः ॥६॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

सुश्रीः पूर्णमनोरथः ॥४१॥ नजातुसभवेदुःखीदेवी
भक्तिपरायणः ॥ भूर्जेकुशादिनालेख्यगोजेणमद
कुंकुमैः ॥४२॥ षट्कोणंवृत्ताष्टदलंषडस्त्रंवज्रलां
छितं ॥ तद्बहिर्भूपुरंयंत्रंमेतन्मंत्रगणान्वितं ॥४३॥
स्तोत्रंवाधारयेदंगेपुस्तकंवागृहेर्चयेत् ॥ अव्याह
ताज्ञोभिःपापः सत्कविःसुभगःसुखी ॥४४॥ धार्मि
कःशत्रुनैष्ठूरः कमनीयोधनीभवेत् ॥ स्त्रीणांवंध्या

का०

(8)

शत०

द्दिदोषेषु शिशोर्बालग्रहादिषु ॥ ४५ ॥ दौर्भाग्ये दुष्टस्व
प्नेषु धारणं शुभदं सदा ॥ वनोत्कटश्मशानादेः यः का
ली विधिवज्जपेत् ॥ ४६ ॥ ऐश्वर्यं शिववत्प्राप्य भवेन्म
त्युजरातिगः ॥ मोहनोच्चाटनादीनि यानि कर्माणि
चेच्छति ॥ ४७ ॥ तानि सिध्यन्ति मनसा जपेन्मन्त्रस्तवं
सदा ॥ परमैश्वर्यसौंदर्यपरमार्थपरायणः परमे
ष्ठिपदं प्राप्य परमेशित्वमृच्छति ॥ ४८ ॥ विपुलपुल ॥ ७ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(8A)

युक्तएवमंत्रीयदिभवतिसदामहर्द्धिसिद्धं॥ सभ

वतिनरदेवएववंद्यःसकलसुखमवाप्यमोक्षमेति

॥२०॥ इतिश्रीकुलार्णवतंत्रेउदयेपरमसिद्धागमे

कालीरहस्येकालीशतनामस्तोत्रंसंपूर्णम्॥ श्रीरस्तु

॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(१)

॥इतिकालिकाशासननामसमाप्तिः॥

॥८॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com